आद्यक्षणसंबन्धः स च स्वरूपसंबन्धविशेषः न तु संयो-
गसमवायः गुणक्रिययोस्तदसम्भवात् तयोश्च उत्पत्ति-
व्यवहारस्य सर्व्वसिद्धत्वात् । प्रकृते स्वरूपसंबन्धविशेषस्य
अनुयोगिस्वरूपएव एवञ्च उत्पत्तिः पटरूप एव नार्था-
न्तरमिति पटस्य उत्पत्तेः प्राक् असत्त्वात् तत्र कारण-
व्यापारापेक्षा भविष्यतीति शङ्कते अथोत्पत्तिरित्यादि ।
दूषयति तथापीति । पटादिशब्देन पटत्वविशिष्टस्यैव
उत्पत्तिमतोऽभ्युक्तत्वात् उत्पद्यते इति न प्रयोक्तव्यम्
तद्वाच्यार्थस्योक्तत्वात् तदुक्तौ च पौनरुक्त्यात् घटो घट
इतिवत् न तत्र शाब्दबोध इति भावः । पटादिशब्दस्य
उत्पत्त्यर्थकत्वे दूषणान्तरमप्याह विनश्यतीत्यादि न वाच्यं
प्रयोक्तुं न शक्यम् अयोग्यत्वादिति शेषः । पटशब्देन
पटत्वविशिष्टस्यैव उत्पत्तिमतोऽभिधानात् उत्पत्तिमति
चैकदा विनाशप्रतियोगित्वासम्भवेनायोग्यत्वादित्यर्थः ।
अयोग्यत्वे हेतुमाह उत्पत्त्यादीति एकत्र एकस्मिन्
धर्म्मिणि युगपदेकदा विरोधात् सहानवस्थानात् । काला-
न्तरे भवितुमर्हतीति द्योतनाय युगपदिति । विनश्यतीति
वर्त्तमानताप्रतीतेर्न विभिन्नकालता तयोरिति भावः। एव-
मुत्पत्तेः पटस्वरूपत्वाभावासम्भवमुक्त्वा अन्यरूपतास्वीका-
रेऽपि उत्पत्तेरुत्पत्त्यसम्भव एवेत्याह तस्मादिदं पटोत्-
पत्तिरित्यादि । स्वकारणसमवायः स्वस्य कारणेषु तन्तुषु
समवायः तत्संबन्धविशेषरूपा पटोत्पत्तिः ।समवायस्य च
सर्वदा विद्यमानत्वात् न तस्या उत्पत्तिः । समवायस्य
नित्यत्वात् पटस्य कादाचित्कोत्पत्तिः कथं स्यादित्यतः
पक्षान्तरमाह स्वसत्तासमवाय इति । स्वसत्तया स्वकारणे
विद्यमानतया यः कारणे समवायस्तथा च स्वसत्ता-
कालिकत्वविशिष्टसमवायस्य पूर्व्वमसत्त्वान्न न कादा-
चित्कत्वव्याघात इति भावः । उभयथापि उत्पत्तेरुभय-
रूपमध्येऽन्यतररूपत्वेऽपीत्यर्थः न उत्पद्यते उत्पत्तिरिति
शेषः । सिद्धस्वरूपत्वेऽपि सर्व्वजनानुभवसिद्धायाः कारण-
व्यापारापेक्षाया अनौचित्यस्य उभयमतेऽपि तुल्यत्वात्
प्रतिवन्दिसमधानमिति भावः । उत्पत्तेः कार्य्यस्य रूपेण
सम्बन्धरूपतां शङ्कते न चेति । पटरूपस्य तन्तुरूपजन्यत्वात्
तेन सह कारणानां संबन्धएव कार्य्यस्य उत्पत्तिस्तथा
च तस्य जन्यत्वात् कारणव्यापारापेक्षेति न समानं
दूषणमिति भावः । दूषयति रूपस्येति । रूपस्य भव-
न्मते गुणत्वेन क्रियारूपत्वाभावात् उत्पत्तेश्च क्रियारूप-
तायाः सर्वैरिष्यमाणत्वात् कारणानां च क्रियानुबन्धित्वे-
नैव कारकत्वाभ्युपगमात् । तन्तुभ्यः पटउत्पद्यते इत्यादिषु
च तन्त्वादीनामुत्पत्तिकारकत्वप्रतीतेश्च नोत्पत्तेः पट-
रूपसंबन्धरूपतेति" भावः ।

**अवयाज्** पु० अव+यज–ण्वि । अपकृष्टयाजके संबुद्धौ अवयाः

**अवयातृ** त्रि० अव+या–तृच् । पृथक् कर्त्तरि । "अदितिर्भि-
वास्ववयाता हरस्य दैव्यस्य" ऋ० ८,४८,२। "अवयाता
पृथक्कर्त्ता" भा० ।

**अवयान** न० अव+या–ल्युट्। अपगतौ "इयं धीर्भूया अव-
यानमेषाम्" ऋ० १,१८५,८, "एषां पापानामवया-
नमपगमम्" भा० ।

**अवयुन** त्रि० वयुनं प्रज्ञा निरु० न०ब० । प्रज्ञाशून्ये ।
"सहस्तमोऽवयुनम्" ऋ० ३,२१,३,

**अवर्** पूजयां कण्ड्वा० प०सक०सेट्। अवर्य्यति पूजतयीत्यर्थः।

**अवर** त्रि० वृ–बा० अप् न०त०। १चरमे, २अधमे,
३कार्य्ये च ।पश्चाद्वर्त्तिनि५देशे ६काले पु० ७दिशि स्त्री
८तद्वर्त्तिनि त्रि०। हस्तिजङ्घायाः ९पश्चाद्देशे न०। "दूरेण
ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय" गी०अस्य व्यवस्थावाचित्वे
सर्व्वनामकार्य्यम् ङसिङ्योस्तु वा । "श्रद्दधानः परां
विद्यामाददीतावरादपि" मनुः अवरस्मादिति च ।व्यवस्था च
देशकृता कालकृता बुद्धिकल्पिता च तत्र देशकृता
यदवरं कौशाम्ब्याः । कालकृता यदवरमाग्रहायण्याः ।
बुद्धिकल्पिता अवरादपीतिमानवे । मासेनावरः मासावरः
इत्यादौ समासे विग्रहवाक्ये च न सर्व्वनामकार्य्यं मासा-
वराय इत्यादि । च "इषुमात्रावरं स्थण्डिलमुपलिप्य" श्र०
सू०। ५त० । अत्यन्तश्रेष्ठे त्रि०।

**अवरज** पु० अवरस्मिन् काले जायते जन–ड । १कनिष्ठसोदरे
भ्रातरि, २शूद्रे च। मनुष्येषु प्रथमोत्पत्तौ तस्य जघन्यजत्वात्
तथात्वम् ३कनिष्ठसोदरभगिन्यां, ४शूद्रायाञ्च स्त्री टाप् ।
"अस्य चावरजं विद्धि भ्रातरं मां तु लक्ष्मणम्" रामा०
"यदि स्त्री यद्यवरजः श्रेयःकिञ्चित् समाचरेत् "मनुः
"विदर्भराजावरजा तथैवम्"। "रावणावरजा तत्र राघवं
मदनातुरा"इति च रघुः ५पश्चाज्जातमात्रे त्रि० ।आत्मभूर-
वरजाखिलप्रजः स्वपतेरवरजत्वमाययौ" माघः ।

**अवरत** त्रि० अव+रम–क्त । विश्रान्ते अनवरतं सततम् ।

**अवरतस्** अव्य० अवर+तसिल्। अवरः अवरस्मिन् अवरस्मा-
दित्यर्थे। अवरतः रमणीयम् आगतः, वसति वा ।

**अवरति** स्त्री अव+रम–क्तिन् । १विरामे, २निवृत्तौ च ।

**अवरवर्ण** पु० कर्म्म० । शूद्रे ।